BHAU DAJI
डाक्टर भाऊदाजी
MEM

अथनित्योत्सवनिबंधप्रारंभः

श्रीगणेशाय नमः ॥ नत्वा नाथपरंपरां शिवमुखां विघ्नेश्वरं श्रीमहाराज्ञीं तत्सचिवां तरीयपृतनानाथांत
दंतःपरां ॥ एषामावृतिदेवताः परिवितान्त्रश्मिस्त्रजानि ज्ञेरान्वीशंश्च प्रणये निबंधनमिदं नाम्नापि नित्यो
त्सवं ॥ १ ॥ अंतेवसता शंभोरवतारेण च्युतस्य षष्ठेन । प्रकटयति कल्पसूत्रं प्रोक्तं रामेण यत्र गदितोर्थः ॥ २ ॥
काश्यांश्रीलन्नूरशर्मेत्यकादियंकविहारिणा ॥ नाथेन भासुरानंदनाथेनेहास्मि योजितः ॥ ३ ॥ यस्मादृ
ष्टो नास्ति भूमंडलेशो यस्या दासो विद्यते विद्यते न क्षितीशः ॥ यस्याज्ञातं नैव शास्त्रं किमन्यैर्यस्याकारः
सापराशांकरेव ॥ ४ ॥ भंगुरा मम सुरेजालकभयप्रसरस्य मे द्विजस्येह । ग्रंथिविमोकधुरीणं गुरुचर
णस्मरणमेव मार्गकरं ॥ ५ ॥ आसंभतरुणयौवनप्रौढनदंतोन्मनानवस्थाख्यैः ॥ सूत्रादितेस्तु समभि
रुल्लासैराश्रिते हविश्रांतिः ॥ ६ ॥ येषु दीक्षागणेशश्यामाक्रोडीपराक्रमाः ॥ सामान्यश्च क्रमोन्ये
षां क्रमेण प्रतिपादिताः ॥ ७ ॥ प्रतिपाद्येषु मुख्यत्वमंगतान्यत्र यद्भवेत् ॥ तत्सर्वं श्रीगुरुप्राक्कोरल्लालो २
केऽधिगम्यतां ॥ ८ ॥ न्यासोपसंहृतेरग्रे प्रयुंजानस्य मे क्रमात् । मप्रसादस्वलितं सम्मोदं भवतादिदं ॥ ९ ॥

सूत्रसंसूचितानुक्तावितरथांगे तु कार्यता । तंत्रांतरालंप्रदायाद्युक्ते ह क्वचित्क्वचित्तु ॥ १० ॥ इह क्रमाणां स
र्वेषां श्रीक्रमः प्रकृतिर्मता ॥ अतिदिश्यते मन्यत्र विशेषस्तु निरूप्यते ॥ ११ ॥ श्रेयोर्थिनः साधकस्य सांगे
श्रीसुंदरीक्रमे । आवश्यकत्वात्प्रथमं दीक्षाविधिरुदीर्यते ॥ १२ ॥ तस्य च कालनिर्णयो मंथानभैरवतं
त्रे ॥ चैत्रे सर्वसिद्धिदा दीक्षा श्रावणे सिद्धिदा नृणां ॥ आश्विने सर्वसिद्धिः स्यात्कार्तिके ज्ञानसिद्धिदा ॥
शुभदा मार्गशीर्षे च माघे स्वर्णप्रदा मता ॥ फाल्गुने सर्वसिद्धिः स्यादन्ये निष्टफलप्रदा ॥ २ ॥ इति सार
संग्रहे मलमासं विवर्जयेदित्युक्तं ॥ इदं क्षयमासस्याप्युपलक्षणं ॥ तत्रैव ॥ रविवारे भवेद्वित्तं सोमे
शांतिर्भवेत्किल ॥ बुधे सौंदर्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ ॥ शुक्रे सौभाग्यमाप्नोतीति ॥ द्वितीया
यां भवेज्ज्ञानं तृतीयायां भवेच्छुचिः ॥ पंचम्यां बुद्धिवृद्धिः स्यात्सौख्यं स्यात्सप्तमीदिने ॥ दशम्यां रा
ज्यसौभाग्यं एकादश्यां शुचिर्भवेत् ॥ द्वादश्यां सर्वसिद्धिः स्यात्पूर्णिमा सर्वसिद्धिदेति ॥ अस्वाध्या
यं विवर्जयेदिति । अस्वाध्यायं ॥ संध्यागर्जितनिर्घोषभूकंपादिनिमित्तकात् ध्यायदिवसानित्यर्थः ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अश्विन्यां सुखमाप्नोति रोहिण्यां वाक्पतिर्भवेत्॥ पुनर्वसौ धनाढ्यः स्यात्पुष्ये शत्रुविनाशनं॥ मघायां
दुःखहानिः स्याद्भपदा पूर्वफल्गुनी॥ ज्ञानं चोत्तरफल्गुन्यां हस्तायां च बली भवेत्॥ चित्रायां ज्ञानसिद्धिः
स्यात्स्वात्यां शत्रुविनाशनं॥ अनूराधा बुद्धिवृध्यै कीर्तिः स्यात्ततः परे॥ बुद्धिः शतभिषायां स्याद्
पूर्वभाद्रे सुखी भवेत्॥ सौख्यं चोत्तरभाद्रायां रेवत्यां कीर्तिवर्धनमिति॥ योगाश्च प्रीतिरायुष्मान्
सौभाग्यः शोभनः शुभः॥ सुकर्मा च धृतिर्बुद्धिर्ध्रुवः सिद्धिश्च हर्षणः॥ वरीयांश्च शिवः सिद्धो ब्र
ह्मा ऐंद्रोप्यमी शुभाः॥ इति च॥ बवादिर्विणिजां तानि करणानि शुभा मेय इतर॥ वैशंपायनसंहिता
यां॥ मंत्राद्यारंभणं मेषे धनधान्यप्रदं भवेत्॥ कर्कटे सर्वसिद्धिः स्यात्कन्या लक्ष्मीप्रदा नृणां॥ तु
लायां सर्वसिद्धिः स्यात्सर्वलाभश्च वृश्चिके॥ मकरे पुत्रदः प्रोक्तः कुंभो धनसमृद्धिदः॥ शुक्लपक्षश्च
भा दीक्षा कृष्णोप्यापंचमीदिनात्॥ भुक्तिकामैः सितेपक्षे मुक्तिकामैः सितेतरे॥ अत्र च गुरुभार्गवयोर्बाल्य २
चंद्रतारानुकूल्यं लग्नस्य ग्रहबलादिकं च विचार्यं॥ ग्रहबलं तु॥ त्रिषडायगताः पापाः शुभाः केंद्रत्रि

कोणगाः॥ दीक्षायां तु शुभाः सर्वे रंध्रस्थाः सर्वनाशकाः॥ अथो कुकालमंतरेणापि दीक्षार्हः कालो यथा॥
तंत्रांतरे॥ विषुवेप्ययनद्वंद्वे संक्रांत्यां दमनोत्सवे॥ दीक्षा कार्यात्वकालेपि पवित्रे गुरुपर्वणि॥ विषुवे तुला
मेषसंक्रमणयोरित्यर्थः॥ अयनद्वंद्वे॥ संक्रांत्यां तदन्यासु संक्रांतिष्वित्यर्थः॥ दमनोत्सव इति चैत्रपूर्णिमा
दिषु दमनकरणकदेवीपूजादिनेष्वित्यर्थः॥ पवित्रे श्रावणपूर्णिमादिषु देव्याः पवित्रारोपणदिवसेष्वित्यर्थ
ः॥ गुरुपर्वणि गुरोर्जन्मव्यामदिनयोः॥ तथा॥ षष्ठी भाद्रपदे मासि कृष्णा॥ श्विन चतुर्दशी॥ कृष्णाकाम
क्षित्यायनोभयत्र॥ कार्तिके नवमी शुक्ला मार्गे कृष्णा च पंचमी॥ पौषे तु पूर्णिमा शुक्ला माघे चैव चतुर्थि
का॥ फाल्गुने च दशी कृष्णा चैत्रे मासि त्रयोदशी॥ शुक्लपक्षीया॥ वैशाखे स्यात्तृतीया ज्येष्ठे दशहरा स्मृ
ता॥ शुक्लदशमी॥ आषाढे द्वादशी कृष्णा अमावास्या च श्रावणे॥ इमानि देविपर्वाणि कोटियज्ञफला
नि वै॥ दीक्षार्हाणीति शेषः॥ सौभाग्यचंद्रोदये अस्मन्नाथचरणैर्वक्ष्यमाणानि देवीपर्वाण्युक्तानि॥ यथा॥
अमांतवा इमास्युचैत्रशुक्लत्रयोदशी॥ चतुर्दश्यपि शुक्लाथ वैशाखे शुक्लपक्षगा॥ तृतीयैकादशी पा

र्नमास्या कृष्णा चतुर्दशी ॥ ज्येष्ठे तु शुक्ला दशमी राका कृष्णा चतुर्दशी ॥ आषाढे शुक्लपक्षस्थे पंचमी चत्र
योदशी ॥ श्रावणे मासि शुक्लैकादशी शुक्ला चतुर्दशी ॥ कृष्णा पंचम्यष्टमी च रोहिणी सहिता यदि ॥ नवमी
चाथ भाद्रस्य कृष्णा षष्ठी तथाष्टमी ॥ रोहिणी सहिता चेत्स्यादाश्विने सप्तमी सिता ॥ अष्टमी च सिता कृ
ष्णा पक्षस्था चतुर्दशी ॥ शुक्ल कार्त्तिके शुक्लपक्षस्थे नवमी द्वादशी तिथी ॥ मार्गशीर्षे तृतीया च षष्ठी धवल
पक्षगे ॥ पौषे चतुर्थी नवमी चतुर्दश्यः सिता मताः ॥ दशमी त्वसिता माघे चतुर्थ्येकादशी सिते ॥ चतुर्दश्यौ
सिता चाथ फाल्गुने शुक्लपक्षगे ॥ षष्ठी नवम्यौ कृष्णा तु भवेदेकादशी तथा ॥ इति च रत्नावली कुलोड्डीशे
यामलाद्यर्थसंग्रह इति ॥ स्वतीर्थे के विधुयासे पुण्यारण्ये वने शुचौ ॥ मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोध
येत् ॥ प्रकारांतरं च ॥ सर्वे वारा ग्रहाः सर्वे नक्षत्राणि चराशयः ॥ यस्मिन्नहनि संतुष्टो गुरुः सर्वे शुभावहाः ॥ सं
तुष्टे च गुरौ तस्य संतुष्टाः सर्वदेवताः ॥ गुरुं संतोषयेद्यत्नाद्दयमेव तदा भवेत् ॥ इयं भोगमोक्षौ एव कारोप्य
र्थः ॥ अधिकारिभेदेन कालो यथा ॥ मुमुक्षूणां सदा कालः स्त्रीणां कालस्तु सर्वदेति ॥ ॥ अथ गुरुशिष्यलक्षणं ॥

तंत्रराजे ॥ सुंदरः सुमुखः स्वच्छः सुलभो बहुतंत्रवित् ॥ असंशयः संशयच्छिन्निरपेक्षो गुरुर्मतः ॥ सौंदर्य
मनवद्यत्वं रूपेषु मुखता पुनः ॥ स्मेरपूर्वाभिभाषित्वं स्वच्छता जितवृत्तिता ॥ सौलभ्यमप्यगर्वित्वं संतो
षो बहुतंत्रता ॥ असंशयस्तत्त्वबोधः स्तच्छिन्नत्वतिपादनात् ॥ नैरपेक्ष्यमविच्छा गुरुत्वं हितवेदिता ॥
एवंविधो गुरुर्ज्ञेयो स्त्वितरः शिष्यदुःखदः ॥ अजिह्मानेति च्छेदः ॥ बहुतंत्रता बहुतंत्रत्ववेदित्वमित्यर्थः ॥
तथा चतुर्भिराद्यैः संयुक्तः श्रद्धावान्सुस्थिराशयः ॥ अलुब्धः स्थिरगात्रश्च प्रेक्ष्यकारी जितेंद्रियः ॥ आस्ति
को दृढभक्तिश्च गुरौ मंत्रे स देवते ॥ एवंविधो भवेच्छिष्य इतरो दुःखकृद्गुरोरिति च ॥ चतुर्भिराद्यैरिति सुंद
रत्वादिभिः ॥ अन्यान्यपि तल्लक्षणानि कुलार्णवादितंत्रेषु बहुलमुपलभ्यमानानि गौरवभियात्र
न लिखितानि ॥ शिष्यपरीक्षाकालोपि तत्रैव ॥ एकद्वित्रिचतुःपंचवर्षाण्यालोच्य योग्यतां ॥ भक्तियुक्तो
न्गुणांश्चापि क्रमाद्ब्रह्मसंकरे ॥ पश्चादुक्तक्रमेणैव वदेद्विद्यामनन्यधीरिति ॥ ससंकरे अनुलोमजातिस
हिते वर्णे ब्राह्मणादिवर्णेष्वित्यर्थः ॥ एकवर्षे ब्राह्मणस्य योग्यता परीक्षा ॥ क्षत्रियादिषु तु द्व्यादिवत्सरपरी
क्षेत्यर्थः ॥ एवमुक्तान्यतमकालयुक्तलक्षणो गुरुरुक्तलक्षणं परीक्ष्य शिष्यं दीक्षयेत् ॥ तत्र निर्वर्त्तिनस्त्रा

ननित्यविधिः साधको वाद्यघोषपुरःसरं ॥ ब्राह्मणैः स्वस्ति वाचयित्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य
श्रेयस्कामोऽहममुकविद्याग्रहणार्थममुकगुरोर्दीक्षां ग्रहिष्यामीति संकल्प्य सोपहारो गुरुमुपसृत्य दंड
वत्प्रणम्य तदनुज्ञया पुनर्देशकालौ संकीर्त्यामुकगोत्रोऽमुकशाखाध्याय्यमुकशर्मवर्माद्यहं चतुर्विध
पुरुषार्थसिध्यर्थं त्वेष्टमनुग्रहणायामुकगोत्रममुकशाखाध्यायिनममुकशर्माणं त्वां गुरुत्वेन वृणे इ
त्यमुकादिना गुरुं वृणुयात् ॥ स च वृतोऽस्मीत्युक्त्वा साशिष्यैः सामयिकैः सह गोमयोपलिप्तं रंगव
ल्लीपुष्पमालावितानकाद्यलंकृतमंडपं विविक्तदीक्षाप्रदेशमासाद्य पादौ प्रक्षाल्याचम्य मंडपांतः प्र
विश्य वक्ष्यमाणविधिनासनमुपविश्य कृतभूतशुद्धिप्राणप्रतिष्ठः कश्च वक्ष्यमाणप्रकारेण गण
पतिललिताश्यामावार्तालीपराणां पंचानां देवतानां कांडानुसमयेन वा यागमंदिरप्रवेशादिचक्रपू
जांतं १ तदादिविघ्नोत्सारणांतं ॥ २ तदादिन्यासांतं ३ तदादिपात्रासादनांतं ४ तदादिलयांगपूजांतं ४
५ तदाद्यावरणार्चनांतं ६ तदादि सौभाग्यहृदयामर्शनांतं ७ तदादिहवनांतं ८ तदादिहविःप्रति
पत्त्यंतं ९ तदादिदेवतोद्वासनांतं १० ॥ तदादिविशेषार्घ्यविसर्जनांतेषु पदार्थेषु यागगृहप्रवेशादि

हवनांतं पदार्थानुसमयेन वा क्रमं प्रवर्त्य तरुणोल्लासवान् शिष्यमाहूय नूतनेन वाससा तस्य मुखं बध्वा गणप
त्यादिमूलमंत्रानुच्चार्य नूपात्रपंचसामान्यार्घ्योदकैर्बिंदुभिस्तमवोक्ष्य त्रैपुरतंत्रसिद्धांतं श्रावयेत् ॥ यथा ॥
पृथिव्यप्तेजोवायुर्वियदिति भूतानि पंच ॥ गंधरसरूपशब्दस्पर्शास्तन्मात्राणि पंच उपस्थपायुपादपाणिवाचः
कर्मेंद्रियाणि पंच ॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रज्ञानेंद्रियाणि पंच रजःसत्वतमोरूपाण्यहंकारबुद्धिम
नांस्यंतःकरणवृत्तित्रयं प्रकृतिर्गुणसाम्यरूपं चित्तं पुरुषो जीवः परमशिवगताः स्वतंत्रतानित्यतानि
त्यतृप्ततासर्वकर्तृतासर्वज्ञताख्या धर्मा एव संकुचिताः संतो जीवे क्रमान्नियतिकालरागकलाविद्या
शब्दवाच्या भवंति ॥ मायाजगत्परमशिवयोर्भेदबुद्धिः ॥ शुद्धविद्यातयोरभेदधीः ॥ जगदिदं तया पश्यन्
परमशिव एवेश्वरः ॥ तदहं तया पश्यन्स एव सदाशिवः ॥ शक्तिः परमशिवस्य जगत्सिसृक्षा तद्वान्स एव
सदाशिवः ॥ शक्तिः परमशिवस्य जगत्सिसृक्षा तद्वान्स एव तत्वेषु प्रथमतत्वरूपः शिवः ॥ इति षट्त्रिंश
त्तत्त्वान्येवैतद्दर्शनप्रमेयजातं ॥ एतदात्मकं विश्वमेव परमशिवशरीरं ॥ प्रागुक्तनित्यत्वादितत्वपंचका
ख्यापरपर्यायेण कलाख्यीकृतेव कंचुकेनावृतस्वरूप ईश्वर एव जीवः निर्मुक्तः परमशिवः स्वस्वरूपावबोधः

पुरुषार्थः ॥ शब्दवर्णात्मकानित्यश्च ॥ मंत्राणामन्यादृशां सामर्थ्यं ॥ स्वगुरुपरंपरैकदेशगम्यधर्मरूप
णासंप्रदायेन गुरुशास्त्रदेवतासु विश्वासेन च सर्वाः सिद्धयः ॥ एतच्छास्त्रप्रामाण्यविश्वासैके
मधिगम्यं ॥ गुरुमंत्रदेवतात्मनां श्रीगुरुकृपयैनैक्यविभावनात्मनः पवनयोरेकयत्न निरोद्धव्य
ज्ञानाच्च प्रत्यगात्मवेदनं ॥ स्वरूपानंदाभिव्यंजकैः पंचमकारैरर्चनमुपक्रमे ॥ प्राकट्यान्निरयः ॥ भा
वनादार्ढ्यान्निग्रहानुग्रहसामर्थ्यलाभः ॥ दर्शनांतराणामनिंदनं ॥ स्वोपास्यदेवतामंतराका
पि महत्त्वबुध्यभावः ॥ साक्षिध्यएव रहस्यप्रकाशनं ॥ सदा स्वोपास्यमंत्रानुसंधानं ॥ संततं शिवो
हमिति भावनं ॥ कामक्रोधलोभमोहमदमात्सर्याणामविहितहिंसायाश्चौर्यस्य जनविरोधस्य स्त्रिया
विद्वेषस्य विद्विषस्य च वर्जनं ॥ सर्वज्ञस्यैकस्य गुरोरुपास्तिः ॥ गुरुवाक्यशास्त्रादौ सर्वत्रासंशयः ॥ स्वैको
पभोगबुध्यार्थमाद्यर्जनं ॥ फलमनभिसंधाय कर्माचरणं ॥ अलोपः स्ववर्णाश्रमोक्तानां नित्यानां कर्मणां ॥
मपंचकस्यालाभेपि नित्यसपर्यानिवर्तनं ॥ वैधानुष्ठाने सर्वतो निर्भयता ॥ रतिभिर्वेद्यं सर्वं हविः ॥ इंद्रिया
ण्येव स्रुचः ॥ संकोचेन स्वात्मस्थिताः सर्वज्ञत्वसर्वकर्तृत्वादयः परमशिवशक्तय एव ज्वालाः ॥ स्वात्मा शिव

एव पावकः ॥ स्वयमेव होता ॥ निर्गुणब्रह्मापरोक्ष्यं फलं ॥ स्वपारमार्थिकस्वरूपलाभान्नपरं विद्यते ॥ सेयमेतच्छा
स्त्रमर्यादा ॥ वेश्या इव प्रकटा वेदाद्या विद्याः ॥ सर्वेषु दर्शनेषु गुप्तेयं विद्या ॥ तत्र सर्वथा मतिमानुदीक्षेतेति
॥ अथ शिष्यस्य शिरसि कामेश्वरीकामेश्वरयोररुणशुक्लस्य चरणन्यासं भावयित्वा ॥ तदमृतक्षरणेन त
स्य बाह्यमांतरं च मलं दूरीकुर्यात् ॥ एषा चरणरूपविन्यासा शांभवी दीक्षा ॥ अथ शिष्यस्य मूलाधारमाब्र
ह्मरंध्रं प्रज्वलंती ज्वलदनलनिभां परां विद्रूपां प्रकाशलहरीं ध्यात्वा तत्किरणैस्तस्य पापपाशान्दहेत्
॥ इयं शाक्तप्रवेशनरूपा शाक्ती दीक्षा ॥ तृतीया ॥ शुंठीमरीचपिप्पलीहरीतकीधात्रीफलबिभीतकलंगे
लालवंगपत्रनागकेसरतक्कोलमदयंतीसहदेवीसंज्ञानां त्रयोदशानां वस्तूनां चूर्णमिश्रेण दूर्वाभस्म
श्यांगजाश्वशालाचतुष्पथवल्मीकनदीसंगमह्रदगोष्ठसमानीमृद्भिः सप्तभिर्मृत्तिकाभिश्चोपेतेन चंदन
काश्मीररोचनाकर्पूरैश्चतुर्भिः सुरभिजलेनाथविनासलिलेन पूर्णं नवीनवासोयुगवेष्टितं ईशानतः शा
लितंडुलपुंजोपरिनिहितं नूतनकलशमाग्नेयादिविदिक्षु मध्ये प्रागादिदिक्षु च बालाषडंगेनाभ्यर्च्य

तदंतर्ल्ललिताश्यामावाराहीणां चक्राणि विनिक्षिप्य तत्र पुनस्तास्तास्तोर्देवतास्थितिस्तत्तन्मूलेन तत्तदावरणा
नि च तत्तन्मंत्रैः समभ्यर्च्य कुंभमस्त्रमंत्रेण संरक्ष्य प्रदर्श्य धेनुयोनिमुद्रे चक्राणि यथास्थानमेव स्थापयेत्॥
ततः सक्षीरेण सिंदूरकुंकुमादिना चंदनादिपीठे मातृकायंत्रं विलिख्य तत्र शिष्यं निवेश्य तेन कुंभांभसा ल
लिताश्यामावार्तालीमूलविद्याभिः स्नपयेत्॥ मातृकायंत्रं तु॥ व्योमेंदोरसनार्णकर्णिकमचां द्वंद्वैः स्फुरत्केसरं प
त्रांतर्गतपंचवर्गयशलाक्षात्रिवर्गक्रमात्॥ आशास्वस्त्रिषु लांतलांगलियुजा क्षोणीपुरेणावृतं वर्णाब्जं शिरस
स्थितं विषगदप्रध्वंसि मृत्युंजयं॥ अस्यार्थः॥ व्योम हकारः इंदुः सकारः ओ इति रूपं रसनार्णः विसर्गः एतत्
पिंडः कर्णिकायां यस्य तथोक्तं। क्रमात्प्राच्यादिष्विवेत्यर्थः। अचां अकारादिविसर्गांतानां षोडशानां स्वराणां द्वं
द्वैः अं आं इत्यादिभिर्लिखितैरिति शेषः॥ स्फुरंतः केसरा दलद्वयमध्यभागा अष्टौ यस्य तथोक्तं॥ पत्रा
णां दलानामंतरष्वंतरे गता लिखिताः॥ पंचवर्गाः कचटतपादीनि पंचपंचाक्षराणि यशला क्षा यः या दि ६
वांतशादिहांतक्षसात्मकाः त्रिवर्गा यस्य तथोक्तं॥ आशासु प्राच्यादिषु अस्त्रिषु आग्नेय्यादिकोणेषु च
क्रमाल्लांतेन वकारेण लांगलिना ठकारेण युज्यत इति तथोक्तेन क्षोणीपुरेण चतुरस्रेणावृतं॥ वर्णाब्जं

मातृकापद्मं शिरसि स्थितं भावितं सदिति शेषः॥ विषगदप्रध्वंसी। विषरोगयोः प्रध्वंसनशीलं॥ अं
ततो मृत्युंजयं च भवतीत्यर्थः॥ एतल्लेखनप्रकारो यथा॥ चतुरस्रालंकृतं सकेसरमष्टदलकमलं वि
लिख्य तत्कर्णिकायां हकारसकारौकारविसर्गात्मकं बीजं तत्केसरेषु प्राच्यादितः अकारादिस्वरद्वं
द्वद्वयं दलांतरेषु कचटतपयशलाख्यवर्गाष्टकं चतुरस्रस्य बाह्यतः प्रागादिदिक्षु वकारं आग्नेय्यादि
विदिक्षु ठं तत्र वर्णं च लिखेत्॥ सर्वेषामक्षराणां सबिंदुकत्वं संप्रदायादिति॥ ततः परिहितदुकूलं सु
रभिलचंदनानुलिप्तांगं मल्लिकादिमाल्यधारणं सुप्रसन्नं शिष्यं पार्श्वे निवेश्य वक्ष्यमाणप्रकारेण
तदंगे धकारादिक्षकारांतैकपंचाशन्मातृकान्यासं विधाय विमुखबंधवाससस्तस्य हस्ते क्रमात्त्रीन्
प्रथमासिक्तांश्चंदनाक्षितान्द्वितीयखंडान्पुष्पखंडांश्च निक्षिप्य वक्ष्यमाणेस्तत्त्वमंत्रैर्ग्रासयित्वा गुरु
स्तस्य दक्षिणकर्णे ललिताक्रमं वक्ष्यमाणं श्रीविद्यागुरुपादुकामंत्रं उपदिश्य बालामुपदिशेत्॥ तत्र अ
मुकपदस्थाने तस्य स्वशक्तेश्च दीक्षानाम्नोहः॥ स्त्रीणां तु वाग्दीक्षा वा विहिता नान्येति तंत्रसारस्थितं॥

वा क्रदीक्षा मंत्रोपदेशः॥ एषा मांत्री दीक्षा॥ इत्थमुक्तदीक्षात्रयमेकप्रयोगेणैकस्मिन्नेव काले दद्यादिति मु
ख्यः पक्षः॥ सर्वांश्च कुर्यादिति सूत्रात्॥ कतिपयकालव्यवधानेन क्रमादेकामेकामेवेति गौणः॥ ए
केकां चेत्येके इति सूत्रात्॥ एवमिदं दीक्षात्रयं निर्वर्त्य पश्चात्तस्मा इष्टमंत्रं दद्यात्॥ ततो गुरुः शिष्यशि
रसि स्वचरणौ निवेश्य॥ इष्टमंत्रक्रमोपयुक्तान्सर्वानागममंत्रांस्तस्मिन्नेव काले क्रमेण वा यथाधिका
रमुपदिश्य स्वांगेषु किमप्यंगं शिष्यं स्पर्शयित्वा तदंगमात्रकाक्षरादिमं द्व्यक्षरं त्र्यक्षरं चतुरक्षरं
वाऽनंदनाथशब्दांतं तस्य नाम कृत्वा दशमरवं ओंकारानाचारानानुशिष्यात्॥ यथा॥ व्यवहारं दशांश्च स्व
स्य स्वाल्प्यबलसहायामथवयांसि च प्रविचार्यैव पंचमाः स्वीकर्तव्याः॥ सर्वैः प्राणिभिः अविरोद्धव्यं
उपासनापरिपंथिनो विनिगृहीतव्याः॥ आश्रिता अनुगृहीतव्याः श्रीगुरुवत् गुरोः पुत्रकलत्रेष्वेषाश्च व
वर्तितव्यं॥ मकारत्रितयेतिकर्तव्यता॥ गुरुशास्त्रसंप्रदायतो ज्ञातव्या॥ सर्वस्मिन्विषये वचनपूर्वकमेव प्र
वर्तितव्यं॥ दशकुलवृक्षा न छेत्तव्याः ते च श्लेष्मातककरंजाक्षनिंबाश्वत्थकदंबकाः॥ बिल्वो वटोडुंबरौ च

तिंत्रिणीति दश स्मृता इति॥ स्त्रीवृंदस्त्रीरकलशासिधलिंगविविधक्रीडाकुलकुमारीकुलसन्कारा शोकेक
तरुपितृवनमत्तवारांगनारक्तांशुकामत्तेभान्दृष्ट्वा वंदितव्यं॥ कृष्णाष्टमीचतुर्दशीदर्शपूर्णिमा
संक्रमणाख्येषु पंचसुपर्वसु विशेषतो नैमित्तिकी वरिवस्या कर्तव्या॥ साधकस्यारंभतरुणयौवनप्रौ
ढतदंतोन्मनानवस्थाख्येषु सप्तसूल्लासेषु प्रौढोल्लासां तमेव हविः प्रतिपत्तिः॥ समयाचाराश्च प्रव
र्तेरन्॥ ततः परां दशां प्राप्तानां स्वैरचारित्वं॥ तत्र तादृशा वीरा॥ वीरव्यवहारेष्वन्यथा संभावनया अधः
पतेत्॥ अतस्तथा नाचरेत्॥ रक्तायास्त्यागं विरक्ताया हठादाक्रमणमुदासीनाया धनादिना प्रलोभनं
वर्जयेत्॥ करुणाशंकाभयलज्जाजुगुप्साकुलजात्यभिमानशीलानि क्रमेण त्यजेत्॥ विहितहिंसा
दौ करुणादीनां प्रातिकूल्येन तत्त्याग उक्त इति भावः॥ गुरुपरमगुर्वोः समागमने प्रथमं गुरुं प्रणमेत्
॥ तदग्रे गुर्वंतरं नमस्यात् न्नातिं प्रकल्पयेत्॥ पूज्येषु नपराङ्मुखो भवेत्॥ मुख्यतया स्वप्रकाशमात्मान
मनुसंदध्यात्॥ शरीरमर्थमसूंश्च गुर्वर्थे धारयेत्॥ तदुक्तं कुर्यात्॥ तद्वचसि युक्तायुक्तं न विचारयेत्॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सर्वं त्र्यवस्थांतन्यात्॥ सत्यं वदेत्॥ परधनं न स्पृहयेत्॥ आत्मस्तुतिं परनिंदां मर्मस्पृग्वचनं परिहासं धि:
कारमाक्रोशं त्रासोत्पादनं वचनं विरध्यात्॥ सर्वप्रयत्नेन परदेवताराधनद्वारा पूर्णज्ञानात्मकं ब्र
ह्मभावमधिलषेत्॥ एतानन्यांश्च मन्वादिभिरुक्तानेतद्विरुद्धानाचारानंगीकुर्वीत॥ इत्थं वेदिता
विधिवद्गुरु॥ तत्र कुलधर्मनिष्ठः सर्वथा कृतकृत्यो भवति॥ तस्य शरीरत्यागे श्वपचगृहे वा काश्यां वा
न विशेषः॥ स तु जीवन्मुक्त एवेति॥ ततो देहेंद्रियादिविलक्षणमवस्थात्रयसाक्षिसच्चिदानंदात्मकं
प्रत्यगभिन्नं ब्रह्मैव त्वमसीति शिष्यायात्मतत्त्वमुपदिश्य ललिताश्यामावार्तालीविद्याभिस्त
दंगत्रीन्परिमृज्य परिरभ्य तं मूर्धन्युपाघ्राय स्वमिव शिष्यमपि परचिद्रूपं कुर्यात्॥ सोऽपि श्रीगुरूपदि
ष्टेन प्रकारेण क्षणमात्मनः पूर्णतां भावयित्वा कृतार्थः सन् यथाविभवं श्रीगुरुं वस्त्रवसनाभरणा
दिभिराराध्यं॥ तस्मादिदं विदितव्य रहस्यजातो ऽशेषमंत्राधिकारी भवेत्॥ ततो गुरुर्हविः प्रतिपत्त्या
दिविशेषार्घ्यविसर्जनांतं विधिशेषं निवर्तयेत्॥ अनेनैकस्मिन्नेव काले समुच्चितेन वान्यतमेनैकैकेन वा
कालभेदाद्वा॥ अनेनैव दीक्षाविधिना गणपत्यादीनामुक्तानां पंचानां देवतानामपि क्रमानुष्ठानं संभवति॥

क

न तु पृथक्पृथक् दीक्षणं॥ सामान्यपद्धत्युक्ततत्तन्मंत्रमात्रोपासकस्य तु पृथक्पृथगेव दीक्षा बालोपासकस्य तु मं
त्रदीक्षात्मतया बालाउपदेश एवेष्टमनुत्वेनाप्युपदेशो ज्ञेयः॥ ललितांगत्वेन श्यामादीनां तिसृणामुपास्तेः कृ
ताकृतत्वज्ञापकान्तरकरणपक्षे गणपतेर्ललिताबालायाश्च क्रमं प्रवर्त्य श्रीरिमयोरेव पात्राण्यासादयेत्॥ चक्रराज
मात्रं कलशे निक्षिप्य श्रीविद्यया केवलं शिष्यस्नपयित्वा तदंगं च परिमृज्य शेषमशेषमनुतिष्ठेत्॥ गण
पतिश्यामादीनामन्यासां च देवतानां स्वातंत्र्येणैकैकोपास्तौ तु तत्तत्क्रममात्रं प्रवर्त्य तत्तत्पात्रे आसा
दिततत्तद्यंत्रं कुंभे निक्षिप्य तत्तन्मंत्रेण स्नानांगपरिमार्जने कुर्यादवशिष्टमविशिष्टमितिविवेकः॥ सुंद
रीमहोदयेत्॥ अस्यां च दीक्षायां त्रैवर्णिकस्यैवाधिकारः॥ सर्वशास्त्रार्थवेदार्थज्ञानिनास्कृत्रतायस्चा॥ दी
क्षोदयेति मूले धिकार्युक्तेरिति स्थितं॥ शक्तीनां तु गुरुमंडलांतर्दर्शनज्ञापकबलेन स्त्यैवाधिकार इति रहस्य
मितिशिवं॥ ॥ इति श्रीभासुरानंदनाथचरणारविंदद्वमिलिंदायमानमानसेनोमानंदनाथेन निर्मिते
भिनवे कल्पसूत्रानुसारिणि नित्योत्सवे निबंधे दीक्षासमारंभनिरूपणो नामारंभोल्लासः प्रथमः संपूर्णः॥

ज्ञानार्णवतंत्रे ।   आद्यत्रयं। ।